गणेश
स्तवनाम

युधिष्ठिर उवाच १

श्रीगणेशाय नमः ॥ श्रीकृष्ण जगतां नाथ कृपां कुरु दयानिधे स्तो
त्रं ब्रूहि महाराज राज्यप्राप्तिफलं कम् १ श्रीकृष्ण उवाच शृणु राज
न्मवक्ष्यामि तवाग्रे स्तोत्रमुत्तमम् सर्वकार्यादि दुःखानां नाशनं वि
घ्ननाशनम् २ कार्यसिद्धिकरं पुण्यं राज्यलक्ष्मीप्रसादकम् श्र
वणात् स्मरणात् नाम गणेशो प्राप्य प्रकीर्तितम् ३ आगतो सौ विघ्नराजेश्च
विघ्ननाशो गणाधिपः लम्बोदरो वक्रतुण्डो विकटेश [illegible] नाय ॥१॥
कः ॥४॥ गजास्यः सिद्धिदाता च सर्वभूषकवाहनः कुमुदो राज्य
मान्य एव शैलजानन्ददायकः ५ गुहाग्रजो महातेजाः कृष्णोम
कि प्रियः प्रभुः सिन्दूराभो गणाध्यक्ष त्रिनेत्रो धनदायकः ६
वामनः सर्वकर्मी च [illegible] शंकरनन्दनः सर्वार्तिनाशनो विघ्नो

॥१॥

गणेशस्तव
नामा

॥२॥

हरं जनः ॥१५॥ तस्य त्रिषु हि कार्याणि सिद्धिर्भवति निश्चि
तम् ॥ राज्यपूज्यो धनाढ्यश्च पुत्रवान् जायते ध्रुवम् ॥१६॥
शत्रुव्याधिविनाशाय नित्यं नित्यं पठेन्नरः तस्य सर्वाणि
नश्यन्ति शत्रवो नात्र संशयः ॥१७॥ श्रीकामस्तु पठेत्
प्रातः विद्याकामस्तु संध्ययोः ॥ स्त्रीकामः पुत्रकामश्च
रात्रौ प्रहरशेषके ॥१८॥ मध्याह्ने कीर्तिकामस्तु पठेत्स्तो
त्रमनुत्तमम् ॥१९॥ इति श्रीगणपतिपुराणे गणप
ति स्तोत्रम् समाप्तं संपूर्णं शुभमस्तु शुभं भूयात्
कार्तिकमासे कृष्णपक्षे पंचम्यां चन्द्रवासरे संपूर्णं लिखितं
संवत १८६२

॥२॥

२

कपित्थो मोदकप्रियः संकटनाशनो देवः सुरासुरनमस्कृतः उमासुतः
कृपालुश्च सर्वज्ञः प्रियदर्शनः ॥८॥ हेरम्बो रक्तनेत्रश्च स्थूलमूर्तिः प्रताप
वान् सुराणां कार्यकर्त्ता च भक्तिरोगाधिनाशनः ॥१०॥ इन्दुदक्षप्रियः
शूरः शम्भुपुत्रोऽघनाशनः एकदन्तो महादन्तो वरदो गजकर्णकः ॥११
विनायको जगत्स्रष्टा जगदीशो दीनवत्सलः विद्याप्रदो महोत्साहो दुःख
दौर्भाग्यनाशनः ॥११॥ ऋद्धिसिद्धिप्रियो भाग्यवन्तो नित्यं सौभाग्यवर्द्ध
नः ॥ दानसूरो हितकृच्च शंकरो विबुधप्रियः ॥१२॥ रक्ताम्बरधरः
श्रेष्ठः शुभ्रदन्तो नागभूषणः ॥ शत्रुध्वंसी चतुर्बाहुः सर्वदारिद्र
नाशनः ॥१३॥ आदिपूज्यो दयाशीलो लोकैकपुंडो महोदरः ॥ सर्व
गः सौख्यदाता सौख्यः कर्तुपूज्यो विबुधप्रियः २४ सर्वदेवमयः
दाता मुक्तिमुक्तिप्रदायकः ॥ इदन्तोगणेशस्य यः पठेत्सा

3